रुद्राहिर्बुध्नपूषादस्रांतकाग्निधाताराः इंद्रादितिगुरुहरिरविवाष्ट्रानिलाख्याक्षणाः राशावङ्कःपंचदशांशोरात्रि
श्चैवंमुहूर्ताविनिसंज्ञा सचविज्ञेयस्तत्वज्ञैश्छायायन्त्राभियुक्तया इति क्षोरक्षीनुक्तकल्पमाह त्यक्तातारा:सप्तपंचत्रि
पूर्वाइति सप्तमीतारांनेयनः पंचमीप्रत्यहरा तृतीयाविपत्करा पूर्वाप्रथमाजन्मतारा एतास्तारास्त्यक्त्वाविहाया
न्यास संपत्करक्षेमसाधकमैत्रातिमैत्रासुकार्यासु यात्राकालेगमनसमयेयुद्धेचैवनकार्यं ३४ अथाचारस्थस्य
राज्ञःप्रशंसार्थमाह आचारस्थःसागरांतांधरित्रींभुंक्तेदीर्घंकालमुत्वातशत्रुः यआचारस्तत्रधर्मस्यवृद्धिर्धर्माद्भो
गान्देहभेदेपिभुंक्ते ३५ आचारस्थः यथोक्ताचारेणवर्तते राजाधरित्रींभूमिंसागरांतांसमुद्रमेखलांदीर्घंचिरंकालं
भुंक्तेखादति कीदृशउत्वातशत्रुः उत्वातानिर्मूलीकृताःशत्रवोरिपवोयेनयत्रतस्मिन्राजनिआचारस्तस्मिंस्तत्रधर्म
स्यपुण्यस्यवृद्धिर्भवति धर्माद्देहभृतांदेहभेदेपिशरीरनाशेपिभोगान्भुंक्तेप्राप्नोतिस्वर्गादाविति ३५ इतिश्रीमद्दोत्पल

विरचितायांयोगयात्राविवृतौवाचाराध्यायोद्वितीयः २ अथाभियोज्याध्यायोव्याख्यायते तत्रादावभियोज्यलक्षणमाह अं
श्रभिहितगु संयुतेनराज्ञाकथितगुणात्ययसंस्थितोभियोज्यः उपद्रुतमुपलभ्ययस्यदेशंवलमथवानिरुपद्रुतोभियुंज्या
त् १ राज्ञानृपेणाभिहितायेराजगुणास्तैःसंयुक्तेन अपरनृपः कथितराजगुणात्ययसंस्थितः कथितानामुक्तानांगुणानांयो
त्ययोविनाशस्तत्रयस्तिष्ठतिसोभियोज्यः आदिष्टः अथवान्यस्यनृपोपद्रुतेनष्टदेशमुपलभ्यनृपोभियुंज्यात् कीदृशोभियु
क्तः निरुपद्रुतः उपद्रवरहितः अभियुंज्यादिति १ अथनज्ञायतेकीदृशंदेशंवलंवोपद्रुतंतत्प्रदर्शनार्थमाह प्रचुरमशकयू
कंमत्तिकादेशपूर्णंवलमजलदहृष्टापांसवाताहतंच पिशितरुधिरधाराप्राणिहृष्टाहतंचकरितुरगमनुष्याध्यानेन
दीनाः २ यत्स्वयमेवंविधंतन्नृपेणराज्ञायोज्यं कीदृशंप्रचुरमशकयूकं प्रचुराःप्रभूतामशकायूकाश्चयस्मिन् तथाम
त्तिकाभिर्देशैःक्षुद्रप्राणिभिःपरिपूर्णंव्याप्तंतथाजलदहृष्टामेघवर्जितवर्षेणपांसुपातेनधूलिवर्षणेनाहतंपीडितं अथ
वापिशितहृष्टामांसवर्षणरुधिरधारारक्तवर्षणंवर्षति मूषकादिप्राणिपातैःप्राणिहृष्टिःपिशितरुधिरधाराप्राणिहृष्टाश्चा
हतंपीडितं अथवाकरिणोहस्तिनःतुरगाअश्वाःमनुष्यानराःध्यानेनचिंतयाःदीनादैन्यमागताः २ अन्यदप्याह शाह्वाय
नेमुद्गरपिशिवागर्दभश्वानतल्पत्यक्तस्त्रिहाःपरिजनसुहृद्वाहनोपस्करेषुः कष्टंकोनःशरणमितिवावादिनोयस्यसैन्येवि
द्विष्टावाप्रवरपुरुषाःसोभियोज्यानृपेण ३ यस्यनृपस्यसैन्येसेनायांशिवगोमायुप्रभृतयोमुद्गर्मुद्गःप्रतिक्षणंगर्दभश्वानत

ल्पंगर्दभकृतशब्दसमकालंशब्दं कुर्वंति केचिद्गर्दभस्यानतल्पंवदन्ति एषोपशब्दः तथाप्रवरपुरुषाःप्रधानपुरुषाःपरिज
नेषुपरिवारलोकेषुसुहृत्सुमित्रेषुवापरिकरकेषुवाहनेषुस्वादिष्टपुष्करेषुभाण्डेषुगृहोपभोगेषुत्यक्तस्नेहाःवैराग्यमागताः
कष्टंकोनःशरणमिति कष्टमितिखेदोनोस्माकंकःशरणंरक्षकोभविष्यतिइतिवादिनःप्रवन्दन्तोभवंतिविद्विष्टाःपरस्परंद्वि
षन्तोयत्रसोपिनृपतिर्नृपेणाभियोज्यः ३ अन्यदप्यभियोज्यलक्षणमाह निद्रालस्यावनतवदनाःकेतनस्वप्नशीलाभ्रष्टाचा
रामलिनपुरुषच्छायाक्रान्तदेहाः दीर्घश्वासाःसजलनयनाःशोकलोभाभिभूताःसैन्येयस्यद्विजगुरुसुहृद्द्वेषिणश्चैवयोथाः ४
यस्यनृपस्यसैन्येसेनायामेवंविधायोधाःसनृपेणराज्ञाभियोज्याः कीदृशायोधाः निद्रालस्यावनतवदना निद्रायाआलस्यंते
नावनतंमुखंयेषांतथा यत्रस्थानकादौनियुक्ताः केतनेसंकेतनस्थानेस्वप्नेनिद्राकरणेशीलाःसंभवोयेषां भ्रष्टाचारानष्टच
रिताः तथामलिनाकृष्णवर्णापुरुषाइत्याचासौशरीरच्छायाकांतिस्तयाक्रान्तेव्याप्तेशरीरंयेषां दीर्घैःश्वासैरुच्छ्वसनैःसं
युक्ताः सजलान्यस्रयुक्तानिनयनानियेषांशोकेनदुःखेनलोभेनचाभिभूताः तथाद्विजानांब्राह्मणानांगुरूणांमित्रादीनांवि
द्वेषिणोविद्वेषशीलाः ४ अन्यदप्यभियोज्यलक्षणमाह अकारणप्रोद्गतरोमकूपजयेनिराशाःप्रकृतेरपेताः श्रमंगालचे
ष्टितजातहासाःसैन्येनयस्यसचाभियोज्यः ५ यस्यनृपस्यसैन्येनरादृशःसोभियोज्यः कीदृशाअकारणप्रोद्गतरोमकूपाः
अकारणमनिमित्तंप्रोद्गतानिरोमकूपानियेषां तथाशत्रुविजयेनिराशानिर्गताआशाअभिलाषोयेषां प्रकृतेःस्वभावादपेताः ५

श्रमंगालेभ्रूकेयदाचेष्टितंतदाजातउत्पन्नः हासोहसनंयेषांतेतथाभूताः ५ अथान्यदप्यभियोज्यलक्षणमाह कपोत
कोल्लकमधूनियस्यसमाश्रयंतेध्वजचामराणि छत्रायुधाद्यानिचसोभियोज्योयस्याथवानाहतनूर्यशब्दः ६ यस्यनृ
पस्यकपोताउल्लकाःकौशिकाःमधुशब्देनमधुकर्त्रीमक्षिकाउच्यंते तथाध्वजंचामरंव्यजनं एतानिछत्रमातपत्रंआ
युधंखड्गादि आदिशब्दाद्गजाश्वगर्दभोष्ट्राज्ञेयाः एतानियस्यचामराणितथाछत्रायुधाद्यानिचसमाश्रयंतेसंसेवन्ते
सोभियोज्यः अथवायस्यानाहतानामतादितानांतूर्याणांशब्दउत्पद्यतेसोभियोज्यः ६ अथान्यदप्यभियोज्यलक्षणमा
ह प्रतीपगत्वंसरितामिषोश्चशोषोथवाशोष्यजलाशयाणां अवारिदेशेसलिलप्रवृत्तिरवैकृतंचाश्मनरेक्षिलावा ७
सोभियोज्यइतिसंबंधः यत्रसरितांनदीनांइषोःशरस्यप्रतीपगत्वं यत्रासनंतत्रैवगमनं अशोष्याणांजलाशयानांउदका
धाराणांचशोषोनिर्जलता अवारिदेशेनिर्जलस्थानेसलिलस्योदकस्यप्रवृत्तिःप्रवर्तनं अवैकृतमविकारपातादिविका
रं विनाश्मजलमध्येशिलापाषाणंवातरेत् ७ अन्यदप्यभियोज्यलक्षणमाह भंगपातचलनाद्यनिमित्तंरोदनानिचसुर
प्रतिमानां अग्निरूपमनलेनविनावानिश्चलानिचयदाप्रचलंति ८ सुरप्रतिमानांदेवाकृतीनामनिमित्तमकारणंभंगः
स्फोटनंपातःपतनं चलनंकंपनं आद्यग्रहणाज्जलहसनंरोदनंच यतउक्तं अनिमित्तभंगचलनंसेदास्कनिपातजल्प
नाद्यानि लिंगार्थायतनानांनाशायनरेशदेशानां इति अग्निरूपमनलेनविनेवेति अनलेनाग्निनाविनावाग्निजज्वाला

रूपंयत्रदृश्यते तथानिश्चलानिवस्त्ररूपाणिचगृहादीनियदाप्रचलंतेकम्पन्तेतत्रसंदेशोभियोज्यः ८ अन्यदप्यभियोज्यमा
ह प्रसूतिंवैकृत्यमकालपुष्पाण्यारण्यसत्वस्यपुरप्रवेशः प्रदोषकालेकृकवाकुशब्दाहिमागमेवान्यभृतप्रलापः ९ यत्र
देशेप्रसूतिंवैकृत्यंप्रसवविकारःस्त्रीणांविडालादेःसदृशमुखंगर्भः अकालपुष्पाणि अऋतावुत्पन्नानिकुसुमानि आर
ण्यसत्वस्यवनप्राणिनोमृगादेःपुरेनगरेप्रवेशःप्रदोषकालेप्रथमेरात्रिमुखेकृकवाकुशब्दःकुक्कुटरवः हिमागमेहेम
न्ते अन्यभृतःकोकिलप्रभृतेःप्रलापः एतेउत्पाताःयत्रसंदेशोभियोज्यः ९ अन्यदाभियोज्यलक्षणमाह दीर्घंदीनंसंहताः
सारमेयाःक्रोशंत्युच्चैर्नित्यमेवाऋतौच हन्युर्योषायोनितानिर्घृणाश्चश्वेतःकाकोनक्तमिन्द्रायुधंच १० यत्रदेशे सारमे
याःश्वानःसंहताःसमेताः बहवः दीर्घंकृत्वादीनमव्यक्तमऋतौशरन्मधुकालेवर्जयित्वा अन्यत्रनित्यंसर्वकालेउच्चैःक्रो
शंतिशब्दंकुर्वंति तथानिर्घृणानिर्दयाःबह्वोयोषितःस्त्रियोयोषाएवस्त्रीः हन्युःश्वेतःकाकःसितवायसः नक्तंराजा
विन्द्रायुधंचयत्रदृश्यते संदेशोभियोज्यः १० अथान्यदप्यभियोज्यलक्षणमाह तिलाविंतैलाःयदिवार्धतैलाःसस्यस्यवृद्धि
र्यदिवातिरिक्ता अन्नस्यवैरस्यमसृक्कृमीणांशुष्कपरोहोविरुजांविनाशः ११ यत्रदेशेतिलाविंतैलाःतैलरहिताभवंति यदि
वार्धतैलाभवंति अर्धेनतिलानांतैलंभवंति यावत्प्रमाणंप्राप्तंतदर्धंभवति यत्रचसस्यस्यचातीवाभ्यधिकावृद्धिर्भवति अ
न्नस्यभोजनस्यचवैरस्यंविगतरसत्वं अमृष्टता वृक्षाणामसृक्प्रसवः तथाशुष्कद्रुमाणांप्ररोहः विरुजांनीरुजांचप्रणाशः

भारयेयुः

यत्रदेशेसोभियोज्यः ११ अथान्यदप्याह विहायसर्पाखुविडालमत्स्यान्स्वजातिमांसान्युपभुंजतेवा व्रजंतिवामैथुनमन्यजा
त्योदीप्ताश्चनित्यंविहगामृगाश्च १२ संदेशोभियोज्यःयत्रसर्वएवतिर्यग्जातयः सर्पाखुविडालमत्स्यान्वर्जयित्वा सर्पउरगः आ
खुर्मूषकः विडालोमार्जारः मत्स्योमीनः एतान्वर्जयित्वा जातिस्वभावत्वात् अन्येस्वजातिमांसान्युपभुंजते परयोनौमैथुनंरच
यंति तथाच सर्वेदुर्भक्षकर्तारःस्वजातिपिशिताशनाः सर्पमूषकमार्जारशृंगरोमविवर्जिताः परयोनावभिगमनंभवतिति
रक्षामसाधुयेनृणां उद्वाणोवान्योन्यंस्वावापनेवृषभपुत्रमिनिवराहसंहितायां तथानित्यंसमकाले दीप्ताःक्रूरशब्दाः
सूर्याभिमुखंविहगाः पक्षिणोमृगाःसदीप्ताहृश्यंते संदेशोभियोज्यः १२ अन्यदभियोज्यमाह भंगःपातस्तोरणेन्द्रध्वजानां
शीतोष्णानांव्यत्ययोभूविदारः निम्नोच्चानांतंगतानिम्नताचच्छायावान्यस्याभिमुखेनयाता १३ तोरणंराजद्वारस्यपुरतोयः
क्रियते इन्द्रध्वजःइन्द्रध्वजार्थंयष्टिः एतेषांभंगःस्फोटनंभवति पातःपतनंवाभवति शीतोष्णानांव्यत्ययःस्वभावाच्छीत
लानांहिमादीनांउष्णं उष्णानामग्न्यादीनांशीतता भूविदारोभूमेर्विदारणं तथानिम्नानांतंगतास्युच्चत्वं उच्चानांनिम्नता
च्छायाशुभसत्वानांसंवर्धिनी अर्कस्याभिमुखेन सम्मुखागाता यत्रदेशेसोभियोज्यः १३ अन्यदप्याह अहातिरिक्तःपव
नोतिचण्डोगन्धर्वसंज्ञस्यभवेत्पुरस्य व्यक्तिर्भवेच्चाहनितारकाणांनक्तंचतारागणसंप्रणाशः १४ यत्रदेशेवायुस्त्र्यहाद्दिन
त्रयादधिकश्चण्डोवहःसंज्ञोभवति तथागंधर्वपुरसंज्ञस्यव्यक्तिर्दर्शनंभवति तथादिनेतारकाणांस्फुटत्वं नक्तंरात्रौतार

कानामदर्शनंसदेशोभियोज्यः १४ अन्यदप्याह प्रासादवेश्मवस्त्रथाशरगुल्मनिम्नेष्वावासकावलिभुजामनपत्यतावा
एकात्मकत्वमथवाभुविमंडलानिऊर्वंतिचक्रकमिवोपरिवाभ्रमन्तः १५ यत्रदेशेवलिभुजांकाकानांप्रासादेदेवप्रासादे
वेश्मनिगृहे वस्त्रथायोंभूमौशरमध्येगुल्मे एकमूलमबहुमूलमंतःशावासबहुगुल्मं निम्नेस्थाने एतेष्वाधारभूतेष्वावासः
आलयः अनपत्यता अपुत्रत्वंवा तेषामेवैकात्मजत्वमेकपुत्रता अथवाभूमौमंडलाकाराणिस्थानानिऊर्वंति उपर्याका
शेवाभ्रमंतः चक्रवालमिवऊर्वंति सदेशोभियोज्यइति १५ उल्काभिघातेनतमोतिदीप्यावक्रातिवक्रेणस्तोयरिक्ताः
केतोर्गतिःस्पर्शनभूमनेनचोरेणपीडांकुरुतेर्कपुत्रः १६ त्रिभिस्त्रिभिर्भैरथकृतिकाद्यैर्निपीडितेभूपतयोभियोज्याः पांचा
लनाथोमगधाधिपश्चकलिंगराडुज्जयिनीपतिश्च १७ अनर्तराट्सैन्धवहारहूरोमद्देश्वरोन्यश्चऊत्तनाथः एतेहिकूर्मो
गसमाश्रितानांविशेषपीडामुपयांतिभूपाः १८ उल्काभिपातेनयस्यनक्षत्रस्यतमोराहुर्ग्रहणकालेतिदीप्यापीडांकुरु
ते भूमिसुतोंगारकोयस्यनक्षत्रस्यवक्रातिवक्रेणपीडांकुरुते अतिवक्रेभुक्तभावः केतुःशिखीगत्यागमनेनस्पर्शनेन
भूमेनातिभूमनेनयस्यनक्षत्रस्यकुरुते यस्यचार्कपुत्रःशनैश्चर श्चारेणपीडांकुरुते तन्नक्षत्रंयस्मिन्देशेकूर्मविभागेन
भवति सदेशोभियोज्यःइति त्रिभिस्त्रिभिर्भैःकृतिकाद्यैस्त्रिभिस्त्रिभिर्नक्षत्रैःपीडितैःपूर्वोक्तेनलक्षणेन एतेवक्ष्यमाणाभू
पतयोभियोज्याः तद्यथा कृतिकाद्येनक्षत्रत्रयेपांचालः आर्द्राद्येमगधाधिपः अश्लेषाद्येकलिंगराट् उत्तराफाल्गुण्यादा

DR. BHAU DAJI MEMORIAL

बुज्जयिनीपतिः स्वात्यादेरनर्तराट् ज्येष्ठाद्येसैन्धवः उत्तराषाढाद्येहारहूरः शतभिषगाद्येमद्देश्वरःरेवत्याद्येकूर्मनाथः एतेराजानःकूर्मांगसमाश्रितानांनृपाणांमध्यात् अथवाकूर्मसदृशादिकूर्मशब्देनोक्ताः तस्याश्चपूर्वदिक्स्थावं दक्षि
णोत्तरपार्श्वपश्चिमाग्रके विदिशश्चत्वारःपार्श्वविशेषपीडांतेभूपाउपयांतिप्राप्नुवंति १८ अन्यदप्यभियोज्यलक्षणमाह अंगे
षुसूर्योयवनेषुचन्द्रोभौमोसवंत्यांमगधेषुसौम्यः सिंहोगुरुर्भोजकटेषुशुक्रःसौरःसुराष्ट्रविषयेवभूव १९ म्लेच्छेषुकेतुश्चत
मःकलिंगेजातोयतोतःपरिपीडितास्ते स्वजन्मदेशान्परिपीडयंतितेतोभियोज्याःक्षितिपेनदेशाः २० अंगेषुसूर्यइति सूर्यश्चा
दित्यः अंगेषुबभूव अंगदेशेजातइत्यर्थः चन्द्रोयवनेषु भौमोसवन्तिविषयेउज्जयिन्यां सौम्योबुधेमगधेषु गुरुर्बृहस्पतिःसिं
धुर्विषये शुक्रोभोजकटेषु सुराष्ट्रविषयेसौरः केतुर्म्लेच्छेषु तमोराहुःकलिंगेजातोयस्मादतोस्माद्धेतोःसूर्यादयोग्रहाःपीडि
ताः उल्काभिघातेनग्रहयुद्धेनवास्वजन्मदेशान्व्यथयंति अतोहेतोःक्षितिपेनतेदेशाअभियोज्याः २० अन्यदप्याह संपूज्यं
तेभैरवोद्धानरावैरक्तैर्मांसैस्तालजंघादयोवा दृश्यन्तेवायातुधानाःप्रभूताभ्रष्टश्रीकःसोपिदेशोभियोज्यः २१ यस्मिन्देशेताल
जंघादयोयक्षविशेषाःसंपूज्यंतेभ्यर्च्यंते कैर्भैरवोद्धानरावैः भैरवैर्भयावहैरुद्धैरतिक्षतैरनरावैःशब्दैःरक्तैरुधिरैर्मांसैश्च य
त्रवाप्रभूतावहवोयातुधानाः राक्षसाभूतपिशाचयक्षाश्चदृश्यन्तेसदेशोभ्रष्टशोभअभियोज्यःइति २१ अधुनाहरदेशाभि
योज्यनिमित्तज्ञानमाह देशभ्रंशोयैर्निमित्तैःप्रदिष्टस्तान्स्तावार्तावक्लिलोकोविशंकः त्यक्त्वादेशंयांतियेभैक्षकावागम्योदे

DR. BHAU DAJI MEMORIAL

शः सोऽप्यसाधुप्रवृत्तः २२ यैर्निमित्तैः करणैर्देशनाशः प्रदिष्टउक्तः तान्वर्तान्कथाविगतशंकोलोकोवक्तिकथयति अथवायेयं
देशंभैक्षकाव्रतिनस्त्यक्त्वाविहाययांति गच्छंतिसोपिदेशश्चसाधुभिर्ईशीलैःप्रवृत्तोवाप्रोगम्यश्चभियोज्यइत्यर्थः २२ अथ
स्वराष्ट्रेनृपस्यदुष्टेदुष्टत्वांतेषुशान्तोक्तायांसर्वराष्ट्रेषुशिवं भवतीत्याह रोगाभिभूतेविषदूषितेवायथाविनाशाभिमुखेवेश
रीरं वैद्यःप्रयोगैःसुदृढंकरोतिराष्ट्रंतथाशान्तिभिरथ्र २३ शरीरंरोगपीडितंविषदूषितंवाविषेणवादूषितं मरणाभिमु
खंसुखंवैद्यःकायचिकित्सकःयथाप्रयोगैरौषधैःसुदृढंकरोति तथाग्रजन्मानोब्राह्मणःशांतिभिःस्वराष्ट्रंदृढंकरोति २३
इतिश्रीयोगयात्राभाष्येभियोज्याध्यायःतृतीयः ३ अथातोयोगाध्यायोव्याख्यायते तत्रादौलग्नादिषुस्थानेषुभावनिरूप
णायाह ओंदेहःकोशोयोर्थवाच्यंमन्त्रःशत्रुर्मार्गोत्यायुः चिंतंकर्मप्राप्तिर्मंत्रीप्राप्तग्राद्याभावाश्चिंत्याः १ प्राप्तग्रमादौयेषां
भावानांतेप्राप्तग्राद्याभावादेहादयश्चिन्त्याः तद्यथा यातर्लग्नेशरीरंदेहंचिंत्यं द्वितीयेकोशःधनं तृतीयेयोधाः चतुर्थेवा
हनादिहस्त्यश्वं पंचमेस्थानेमंत्रं षष्ठेशत्रुः सप्तमेमार्गःपंथा अष्टमेआयुर्जीवितं नवमेचित्तं दशमेकर्म एकादशेक
र्मफलप्राप्तिः द्वादशेमंत्रिणइति तथाचबादरायणः देहार्थसारंबलवाहनानिमंत्रारिमार्गःसहजीवितेन धर्मार्थलब्धिर्व
तवाह्यमात्याःस्थानेषुलग्नादिषुचिन्तनीयाः इति १ अथतेषांभावानांक्षयवृद्धिलक्षणमाह त्रिलाभवर्जेरविसौरभौमा
निघ्नंतिनोकर्मणिसूर्यभौमौ पुष्णंतिसोम्यारिपुराशिवर्जमस्तंभृगुर्मृत्युविलग्नमिन्दुः २ रविसौरभौमाः आदित्यशनैश्चरौगा

रकाःयस्मिन्भावेवावस्थितातस्यभावस्यनिघ्नंतिक्षयंकुर्वंतिकिंसर्वस्यभावगणस्यनेत्याह तृतीयस्थानमेकादशस्थानेच
पुष्णंति तृतीयस्थानेयोधावृद्धिंकुर्वंति एकादशेकर्मफलप्राप्तिंवृद्धिं नोकर्मणिसूर्यभौमाविति कर्मणिदशमेसूर्योरविः
भौमोंगारकः एतौविद्यातेनकुरुतः कर्मणोवृद्धिंकुर्वंतइत्यर्थः तत्रस्थःशनैश्चरःकर्महानिं तत्रैवजातं रविभौमशनयः
लग्नद्वितीयचतुर्थपंचमसप्तमनवमद्वादशेशुभाः तृतीयषष्ठैकादशेषुशुभाः दशमेशनैश्चरोनशुभः रविभौमौशु
भौ यस्मादादित्यांगारकशनैश्चरालग्नगताःशरीरहानिंकुर्वंति द्वितीयेधनहानिं तृतीयेधनवृद्धिं चतुर्थेवाहनहानिं
पंचमेमंत्रहानिं षष्ठेशत्रुहानिं सप्तमेमार्गहानिं अष्टमेआयुषःक्षयं नवमेचित्तपीडां दशमेशनैश्चरेकर्मक्षयं सूर्यभौ
मौतवृद्धिं एकादशेसर्वएवकर्मफलवृद्धिं द्वादशेमंत्रक्षयःइतिपुष्णंति सौम्यानिरिपुराशिवर्जमिति सौम्यावुधजी
वसिताः रिपुराशिवर्जंषष्ठस्थानंवर्जयित्वाभृगुःशुक्रःपुष्णाति इन्दुश्चन्द्रोमृत्युविलग्नंअष्टमस्थानंवर्जयित्वान्यत्रपुष्णा
ति तेनलग्नेस्थिताःशरीरपीडांकुर्वंति द्वितीयेधनवृद्धिं तृतीयेयोधवृद्धिं चतुर्थेवाहनवृद्धिंपंचमेमन्त्रवृद्धिं षष्ठेशत्रुवृ
द्धिं शुक्रःक्षयंयस्माद्रुक्रमस्तंभृगुरिति बुधजीवशुक्राः अष्टमेआयुषोवृद्धिं नवमेचेतसोवृद्धिं एकादशेलाभवृद्धिंद्वा
दशेमन्त्रवृद्धिं चन्द्रमाःकृष्णपक्षेपापतुल्यः किन्तुशुक्लपक्षेअष्टमश्चन्द्रमा आयुषःक्षयंकरोति यस्माद्रुक्रंमृत्युवि
लग्नमिन्दुरिति तथाचबादरायणः सौम्यैर्वृद्धिंभार्गवेशत्रुवर्जनात्तेशुक्रेनाष्टमेशीतरश्मौ पापैर्नाशोनतृतीयेनलग्ना

भे नास्तेवस्थेभूमिजोवापितस्य २ अथुनायोगमाहात्म्यमाह तिथ्युडुमेन्दुकरणर्क्षदिनक्षणेषुपापेष्वभीष्टफलदाभूप
तेर्यथास्यात् यात्रातथापरिमितंकथयामिगुह्यंशिष्यायनैतदचिराप्युषितायदद्यात् ३ तिथौनन्दादिकेऽङ्गमेऽदय
लग्नेचन्द्रेकरणेवावादौ ऋक्षेनक्षत्रेदिनग्रहवारेक्षणेमुहूर्ते एतेषुपापेष्वपि अनिष्टेषुसत्स्वपिभूपतेर्यथायेनप्रकारेण।
इष्टफलाभवंति तथातेनैवप्रकारेणपरिकृष्टमिदंगुह्यंरहस्यभूतंयोगप्रसंगेनकथयामि एतच्छिष्यायाचिराप्युषिताय
स्वल्पकालशुश्रूषवेनदद्यात् इति तथाचवादरायणः ऋक्षेऽष्टेकरणेवामुहूर्तेयात्राशस्तायोगसंपद्यदिस्यात् त
स्मात्तस्मात्संपरायेपिकार्येयोगप्राप्याभूमिपालोव्रजेत ३ अथयोगवशेनराज्ञपवगमनमाह योगैःक्षितिपाविनिर्गताः
शकुनैस्तस्करचारणादयः नक्षत्रगुणैर्द्विजातयःक्षणवीर्यादितरोजनोर्थभाक् ४ क्षितिपाराजानःशुभयोगैर्विनिर्गताअ
र्थभाजोभवंति तस्कराश्चोरारोगोपजीविनःशकुनैःशुभैर्विनिर्गताअर्थभाजोभवंति इतरजनायेत्रानुक्ताःतेक्षणवीर्यान्मुहू
र्तेनशुभेननिर्गताअर्थभाजोभवंति तथाचवादरायणः योगैर्भूपाश्चारणाद्यानिमित्तैर्ऋक्षैर्विप्राःशेषवर्णामुहूर्तैः एतैर्या
ताःप्राप्नुवन्त्यर्थसिद्धिमुक्तानुक्तालभ्यज्ञातसर्वेइति ४ अथुनायोगेसतिग्रहकुंडलिकाफलस्वभावमाह यद्द्रव्योगव
शाद्भुजन्यगदतांद्रव्यैर्विषंयोजितंसंयुक्तमथुनाहृतंचविषतांगच्छेद्यथादृश्यते तद्द्रव्योगसमुद्भवंप्रकुरुतेहित्वाग्रहःस्वं
फलंतस्मात्तिनसमुद्यतोस्मिगदितंयोगान्विचित्रानिमान् ५ जयाकुलिकादियोगेषुयद्द्रव्यथान्यद्रव्यैःसहविषंयोजितंयो

गवशाद्योगहेतोरगदतांव्रजतिगच्छति गदंरोगंनाशयति तथामधुसमेतंहृतंयोजितं यथाविषतांगच्छतिविषत्वमेति ए
वंयोगोयोगफलमेवभवति एवंदृश्यतेयेनप्रकारेण तथातेनैवप्रकारेणग्रहःदृष्टकुंडलिकाफलंददाति स्वात्मीयंकुंडलि
काफलंहित्वाविनाशयोगसंभवंयोगोत्थमेवफलंकरोति यस्मादेवंतस्माद्विचित्रानानाप्रकारान्योगानादितंसमुद्यतो
स्मिइति तथाचवादरायणः युक्तंतृणमौषधतांकरोतियोगेविषंक्षौद्रयुतंससर्पिः विषीभवत्येवतथैवयोगेफलंग्रहा
णांनदृष्टशिचिंत्यं यवनेश्वरश्च भिषक्प्रयुक्तस्ययथाहियोगेद्रव्यस्यवीर्यंनदृष्टशिचिंत्यं सुरादिभावेषुफलंग्रहाणांयो
गेषुतद्वत्तविकल्पनीयइति नन्वत्रदेहःकोशोयोभावाद्यमित्यनेनप्राणप्रादिरिष्फपर्यवसानस्थितोदेहादिमन्त्रपर्यव
सानभावानांयथासंख्यविकल्पनाकृता त्रिलाभवर्जेरविसौरभौमाइत्यनेनापिसूत्रेणपोषणविद्वेषणावभिहितो
तिथ्युडुमेन्दुकरणर्क्षदिनक्षणेष्वित्यनेनतिथिलग्नाद्यनिष्टत्वेपियातुर्यात्रेष्टफलंभवति तथाफलायथास्त्याचार्येणो
क्तं तत्रज्ञायतेकेनोपायेनतिथिलग्नादिभिरनिष्टेरपियातुःकार्यायात्रेष्टफलंभवतीति यथायोगेक्षितिपाविनिर्गताइ
त्यनेनापिक्षितिपादीनांयोगादीनांनियमःकृतः यद्वायोगवशाद्भुजन्यगदतां अनेनदृष्टांतेरणयोगानांफलातिश
यःख्यापितः सांप्रतंनिरूप्यते तथादेहादिभावानांनिर्देशेनकिंचित्फलमुपलभ्यतेयोगेन अथदेहःकोशोयोभावाद्य
मिति यदिपरिभाषेयं तदात्रिलाभवर्जेरविसौरभौमाइत्यनयाभावानांपोषणविनाशचिंतयानप्रयोजनं तिथ्युडुमादौ

नांचपातंतोहिप्रकाशस्वतःपरतश्चसाचमन्दबुद्धीनांप्रकाशार्थमुपदिश्यते तिथीनांचस्वतःपाताः तावतनेष्टामध्याः प्र
वराश्चेतिशुक्लेरत्यादिपरतोव्यतिपातादिज्ञातज्ञातःलग्नानांस्वतः मेषवृश्चिककर्कदेवैर्नृणामित्यादिपरतः सौम्योपिन
न्मनिरयःशुभपुष्टिदाताइत्यादि उल्काभिज्ञातादिचचन्द्रस्यनिष्टतास्वतःप्रतीणता यत्नगोचराद्यनिष्टता परभूतोभृगु
सुतवृथभिन्नैरित्यादिकरणानांस्वतो गरवनिजविष्टिवर्जितानिकरणानिरत्यादिपरतोव्यतिपाताभिज्ञातः नक्षत्राणांस्व
तः रोहाज्ञाहियमानिलानलमघाशक्राभिभिर्निर्मितंरत्यादि परतोऽर्कैर्शौर्यौसंयुतोतःप्रकोपरत्यादिदिवसानांस्वतः
ग्रहनिसवितसूनोर्दैन्यमाप्नोतिगच्छनित्यादिपरतः अनुपचयगताहः शस्तमप्यप्रशस्तरत्यादिनक्षत्रदोषात्क्षणानांदो
षाः एवंव्यवस्थितेसर्वसन्दिश्यते यथातथोच्यते लग्नादिरिष्फपर्यवसानानां यथासंख्यंदेहादिमेत्रिपर्यवसानभावानांत्रि
लाभवर्जेरविसौरभौमाइत्यादि येनावश्यमेवपोषणविनाशौनिरूप्यते कृतपवलभ्यतइत्युच्यतेभावशुद्धिवशेनकल्पमान
स्यातएवार्थःसंजायते यथासतथोच्यते सौरेभौमेलग्नगेर्केत्वमध्येइत्यस्मिन्योगेसौरेभौमेवालग्नगेभिहितः कदाचिद्भौमः
सौरश्चदेहशुद्धिन्यायेदेहविनाशंकरोति अस्मिंश्चयोगेनिर्गतेयातोःशोभनंफलमभिहितं यायाद्भूपालःशत्रुदेशंनिहंतुमि
त्यादि एवंयोगसमुद्रवंप्रकुरुतेहित्वाग्रहःस्वफलरत्यनेनदृष्टांतवाक्येनयोगगतःसौरःस्वकीयंफलंपरित्यज्ययोगजंफ
लंप्रयच्छति एवमन्येग्रहायोगकारकास्तेष्वनिष्टफलमपिस्वफलंपरित्यज्ययोगजंप्रयच्छंति येतयोगवाह्यग्रहायेषांयो

गांतःपातित्वंनास्ति ततःस्वकीयंभावफलमिष्टमनिष्टंवाप्रयच्छंति इति तस्माद्योगकारकाग्रहास्तेस्वफलंपरित्यज्ययोगजं
फलंप्रयच्छंति तच्चयथायथानिर्दिश्यते त्रिषडायांत्येष्वक्लःशशांकरत्यस्यचयोगस्यगुर्विन्दुकारकौतोचयोगफलदौयदा
त्वस्मिन्नेवयोगेरविसौरभौमाग्रहमस्थानस्थाग्रमीषामत्यंतमेवतदास्वफलदाभवंति यस्मादतएवान्यस्मिन्योगेकर्तृत्वमेव
नास्ति तस्मात्स्वफलंप्रयच्छंतिस्वफलमायुर्निघ्नंति परिघादियोगास्थानव्यवस्थितानांग्रहाणामव्यतिरेकेनयदाच ....
अव्यतिरेकेणव्यवस्थितायदापरेव्यवस्थिताः तदापरिपठितयोगभंगःस्यात् योगान्यत्वंच यस्मिन्विषयेद्वयोःसहसंयोगे
योगाफलंदर्शितमिति तिथ्युडुमेन्दुकरणर्क्षदिनक्षणे ध्वपीत्यस्यवद्यस्यविषयविभागेनान्यद्वेत्यर्थःप्रयुज्यते यदादि
तिथ्यादीनामल्पतास्वल्पवलताभवति यात्रापरिशुद्धौ आत्ययिकेकार्येयोगाध्यायोक्तलाभशुभेतिथ्यादावनिष्टफले
पियोगाफलमंगीकृत्यविनिगीषुणायातव्यं तिथ्यादीनांस्वल्पदोषत्वात् यथाचव्यतिपातकेतल्कापातादिभिःपाप
ता तदायोगलाभेष्वात्ययिकेपिकार्ये यातव्यं यदिदमस्माभिर्व्याख्यातं यथायोगस्यायंविषयः आत्ययेषुकार्येषुयो
गेयातव्यमित्येतद्बृहस्पतिनाप्युक्तं शक्यंभावगतंबुद्ध्वापरसिंहवदाचरेत् एतामवस्थांयोगेनयुक्तंवक्तिपराशरः स्वदेश
कालशक्तीनामुपायेव्यसनेरिपोः मारुत्स्यप्रयोगेनयात्रांयोगेनयोजयेत् तथाचचाणिक्यो आत्यकेकार्ययातेदैवेनच
पीडितेचयातव्यं केवलविलप्रयोगादपियातासिद्धिमाप्नोति तथाचयवनेश्वरः कार्यातिपातोतरितोयियासुर्भावान्वि

तोपिप्रतिकूलकालः शुभेषु दृष्टावपि दृष्टमिष्टमिष्टेविलग्नेपरिहृत्ययाता एतन्मध्यादाचार्येणांतरमेवप्रदर्शितं तस्मादा
त्ययिककार्येषु द्वारेषु प्रोक्तंगमनंयोगेष्वित्येतत्सिद्धिर्यथाकामंयायात् संपरायेषु कार्येषु द्वारेषु प्रयोज्याश्लानिभानिद्वा
रिनक्षत्रनिर्गतस्यानिष्टफलमभिहितं स्मरपतिरपिकृष्णानिभेलंघयित्वा इत्यादिवक्ष्यतिच कामंयायात्संपरायेषु कार्ये
ष्विति सांपरायिकंसांग्रामिकमुच्यते सांग्रामिकेरिपुच्छिद्रादिष्वात्ययकेषु कार्येषु द्वारिनक्षत्रेष्वपिकामंयायात्प्रज्या
शीलानिभानिदिक्मूलनक्षत्राणिपरित्यज्यकामंयायात् यदापुनर्दिक्मूलनक्षत्रंभवति तदारिपुच्छिद्रादिषु कार्येषुन
यायात् पापेषुभीष्टफलदातृपतेःफलाप्तिरित्यस्मादित्यपिशब्दोत्रसंभावनायांवर्तते नापवादरूपेणाह यस्माद्योगाध्या
येनंतरमेवपूर्वादितस्त्रियपरिवर्तगतेरजाद्यैरित्यादिग्रन्थेनापिलग्नादीनामुत्सवाइत्यादिरिक्तादिनिथावद्यतिपातइष्टइ
त्यादि तिथौ चतुर्दशीचतुर्थीनवमीमित्यादि गोचरेणशुभदःशशीनचेदित्यादि दिनकृद्दिवसेथवांशके यात्रालग्नगते
थवारवौ संतापयतिस्मरात्तरेवेशपार्थविवर्जितेनरमित्यादि व्रजतियदिलग्नोदयेदिर्गशित्यादियतोनरस्यप्रतिलोमका
ष्ठमित्यादिलग्नेनहीनान्यगुणान्वितापिप्रीतिंनयात्रामनसःकरोतीत्यादि निर्देशनांतरेरानुकूल्यतामथवापिशब्दस्यय
द्यपवादरूपताकल्पनेनसंभावना तथातिथ्युद्गमादीनामिष्टानिष्टचिंतयापुनरभिधानेनकिंचित्प्रयोजनं निर्देशस्या
यंविषयः यदायोगाध्यायोक्तयोगोलभ्यते तदातिथ्युद्गमादिभिरत्येतानिष्टफलैरपियात्राप्रयुज्यते तस्माद्योगानांस

र्वेषांयाशुद्धिरुक्तासानिरूपितारत्यपरामर्शापिक्रमः यदायोगाभावेपितिथ्युद्गमादीनांशुद्धिरुक्ता तदाकस्माद्रूपशुद्धिःसाद्गुण
दगोप्यत्राचार्येणोक्ताःकिंतिथ्यादिभिरेवकेवलैःपरिशुद्धैर्यात्रायाःपरिशुद्ध्यतेरतितदासमूच्यते यदायोगाध्यायोक्तयोगला
भेपितिथ्युद्गमादीनांयात्रापरिशुद्धिरुक्तासानिरूपणीयारत्यथैवंमन्यसे यदिबलाबलचिन्ताक्रमेणापितिथ्युद्गमादिभ्यो
योगबलेनातिरिच्यते यस्मात्करणभतिथिवासरोदयानांचरणवृद्धिरनुक्रमात्फलानामिति अनेनग्रन्थेनाचार्यःपादवृद्धि
क्रमेणैतेषांबलवत्तमभिधाय पुनःस्पष्टयोगाध्यायेपापेषुभीष्टफलदातृपतेर्यथास्यादित्यनेनापिवादवाक्येनतिथ्युद्गमा
दिभ्योपियोगोबलीयानितिनिर्दिशति तस्मातिथ्युद्गमादिभ्योपियोगोबलीयानतिरिच्यतइति एवंत्वद्रूपः नैतदेवंयस्मा
त् अस्मिन्नेवयोगाध्यायेहोराष्टमेजन्मगृहाष्टमेवास्वाच्छत्रुभाच्छत्रुगृहोदयेवा अस्येवलग्नस्यविषभक्षणतुल्यंनिर्दिशति
तस्मादेवमवगम्यते यथातिथ्युद्गमादीनांसकाशाद्योगातिरिच्यते इत्यत्रापिवंमन्यसे यदितिथ्यादिभ्योयोगेनबलेनातिरि
च्यते तदापरिपठितयोगव्यवस्थितैर्यैरपिकथंयोगफलंशोभनंनिर्दिष्टमितिचोद्यदिश्यते सिंहाजनौलिमिथुनाभृगक
र्कटौचस्वेदान्विताभवतियस्यशनिश्चलग्नेइत्यस्मिन्योगेतावद्योगफलव्यतिरेकेनयात्राप्रकारेणोक्तेनन्यायेनलग्नसका
शादेकद्वित्रादिस्थानव्यवस्थितेषुग्रहेषुयात्राफलंनिरूप्यते भूत्पंकरोतिनिधनेसवितारुनंचेत्यनेनन्यायेनाभिहितं य
थालग्नादष्टमस्थानव्यवस्थितःसवितापातभूत्पंकरोति वन्धुत्वयारिभयकृद्विबुकेमहीजइत्यनेनाभिहितं यथाच॰

तुर्थस्थानव्यवस्थितोभौमोवन्धुक्षयमरिभयंचकरोति यात्राफलेचतुर्थेजामित्रेसामान्याद्भौमश्चतुर्थस्थानस्थोयात्राफले
नाशयति अर्थेलाभयुक्तवतिदोषविनाशदोसौरत्यनेनग्रंथेनोक्तं यथाक्षीणचन्द्रमाःसप्तमस्थः अर्थनाशंकरोति वन्धेवधेचा
र्कसतोविलग्नेयथाबंधेवधंशनिर्लग्नगःकरोति लग्नकेन्द्रेशनेश्चरेद्वितीयकेन्द्रेऊनः तृतीयसोमयतेरेश्चकेन्द्रस्थैःफलम
भिहितं सौम्यैःक्षयस्थैःकृच्छ्रेणसिद्धिमुपैतियातः इतिपृष्ठोदयत्वान्मकरलग्नस्यपृष्ठोदयविकलतावलविद्रवश्चेत्यनेनग्र
न्थेनफलमभिहितं मकरलग्नविनिर्गतस्ययात्राविफलतावलविद्रवश्चभवति शनिर्मकरलग्नस्याधिपतिरितिकृत्वाव्यव्या
धिनाशावमानइत्यादिनाग्रन्थेनपुनस्तस्यैवमकरलग्नस्यानिष्टमभिहितं सवितृतनयःस्वस्थानस्थोयनांगविनाशकृदित्यनेना
पवादवाक्येनराशिग्रहभयनियमंफलमभिहितं मकरेस्थितंयनविनाशमंगनाशंचकरोति एवंव्यवस्थितेसंस्थानेलग्नका
लेनिरूप्यमरणमत्यंतानिष्टफलंभवति वस्तुनिच लग्नफलंतत्सैनिकानांवलंक्षपयति यातमूर्खस्यवित्तमिवचारणविशद
त्यस्मादेवेदमुपगम्यते तदाग्रहभुद्धिन्यायेणोक्तफलस्ययोगफलेनसहपरस्परवाधोभवति सचार्यस्यपूर्वापरविरुद्धंग्रन्थं
यथालग्नादिभ्यःयोगफलेनातिरिच्यतेइति वयंत्वत्रब्रूमः नेतत् यस्माल्लग्नादीनांसन्मार्गापवादरूपेणयात्राप्रकरणेनफलं
तच्चात्मेत्यत्रवन्धव्याधिनीवावमानः मकरलग्नस्यानिष्टफलमभिहितं संतापदोमकरेर्कइत्यनेनापिवाक्येनाविष्टराशौलग्ने
स्थितस्ययदापुनर्मकरलग्नेव्यवस्थितःसूर्यस्तदास्वस्तस्थानेषुसूर्यःस्त्रीरत्नजयप्रदोलग्नेइत्यादिनाग्रन्थेनलग्नग्रहोभयनि

यमंफलेस्वेचलग्नावस्थितमनिष्टफलंविनाशयस्वस्तस्थानेसूर्यइत्यनेनापिसूत्रेणोपदिष्टफलंशोभनंप्रयच्छति तथान
तिष्युद्गमादीनामिष्टानिष्टानिफलानितानिनाशयितुंसूर्यःशक्नोति किन्त्वपवादवाक्यनिर्देशस्यएतावन्मात्रमेवफलं
स्वेचलग्नावस्थमनिष्टंविनाशयत्यथायोगजंफलंप्रयच्छति नतिष्युद्गमादीनांत्वनिष्टफलानितानिविनाशयितुंतेषांसा
मर्थ्यं तस्मात्तिष्युद्गमादिभ्योयोगवलेनातिरिच्यते इत्यन्यथा सर्वएवप्राणीशुभाशुभैःज्योतिर्विदोप्रश्ननिमित्तंगमन
मभिहितामुपलब्धिंकरोति कोयदिनवारः किंनक्षत्रंकातिथिः यदाशुभास्तिथ्यादयस्तदागमनंनकरोति तिथ्याद्यास्ते
नोपलब्धास्तदानकेवलंयात्रेदन्यानिस्वल्पकान्यपिप्रतिनिवर्तंते तस्मात्सर्वएवतिथ्याद्यायात्रायांशुभाग्राह्याः उक्तमेत
दुच्यते मुहूर्ततिथिनक्षत्रकरणानिचसर्वदाशिष्टाः स्मृतत्वान्नृपतेराश्रियेतविचक्षणः तस्मात्तिथ्यादिसर्वापेक्षोयोगा
ध्यायोयंपरिवद्धयोगइति यद्येवं तथातिष्युद्गमादिनिरपेक्षः योगस्तत्रघटतेइति ॥५ अथयात्राकालेशुभाशुभयोगा
नाह लग्नेगुरुर्वृषभृगुहिबुकात्मजस्थोषष्ठेऊनार्कतनयोदिनकृत्तृतीयः चन्द्रश्चयस्यदशमेभवतिप्रयातस्तस्याभिवां
छितफलाप्तिरलंनृपस्य ६ यस्यप्रयातुर्गच्छतः लग्नेगुरुर्जीवः वृषभृगुर्यथासंख्यंहिबुकात्मजस्थोवृषशुक्रोचतुर्थपं
चमस्थानस्थोऊनार्कतनयोभौमशनैश्चरोषष्ठेयात्रस्थानेस्थोदिनकृदादित्यस्तृतीयेचन्द्रःशशीदशमेपवेवियोगोभ
वतितस्यनृपस्यराज्ञःअभिवांछितस्याभीष्टफलस्यप्राप्तिःफललब्धिरलंपर्याप्तामभवति तथाचवादरायणः इश्चिकरज

वह्नाहादिमंगलंप्रतिनिवर्तते या

करोति यदाचन्द्रतिष्यादयस्तदागमनं ८

न्मासिनयाद्यपत्रषष्ठोपगायस्यभवंतियाने सूर्यादयस्तस्यभवंत्यभीष्टाकामाःप्रयातस्यनरेश्वरस्य ६ अन्यदप्याह होरातृती
यरिपुलाभगतःक्रमेणजीवार्कभौमरविभिर्भृगुनेनकूले योयातिहृन्नमपिशत्रुबलंनिहंतिनेशंतमिस्रमिवतिग्ममयूखमा
ली ७ होरालग्नंतृतीयंहिश्चिकंरिपुस्थानेषष्ठेलाभमेकादशे एतेषुस्थानेषुयथासंख्यंगतेर्जीवार्किभौमरविभिः जीवोबृ
हस्पतिः शार्किःसौरःभौमःकुजःरविरादित्यः तत्रैतज्ज्ञानं लग्नेगुरुस्तृतीयेसौरःषष्ठेभौमःएकादशेसूर्यः भृगुनेशुक्रेनकू
लेयात्यदिकूलवर्तीयथाभवति एवंविधेयोगेराजागतश्चनिरुद्धमपिगरिष्ठंअपिशत्रुसैन्यंनिहंतिघातयति यथानेशमंध
कारंतिग्ममालीरविः तथाचवादरायणः लग्नत्रिभागपरिगतैःक्रमेणजीवार्किसूर्यावनिजैःसितेव यावत्स्वदिक्कूलगते
नरेन्द्रःशत्रोर्बलंहंतिगतोचिरेण ७ अन्ययोगांतरमाह उदयारिनभस्तलगैर्दिनकृद्यमशीतकरैः नभवंत्ययोभिमुखाहरि
णैरिवकेसरिणः ८ लग्नषष्ठदशमस्थैर्यथासंख्यंसूर्यसौरशशिभिः तत्रैतज्ज्ञानं लग्नेसूर्यःषष्ठेसौरः दशमेचन्द्रः एवंविधयो
गेगतस्यराज्ञः अरयः शत्रवःसंग्रामेभिमुखाःसंमुखानभवंति कस्येकेरव यथाहरिणामृगाःकेसरिणःसिंहस्य तथाचवाद
रायणः दिवाकरेलग्नगतेयदिस्यात्षष्ठेर्कसूनुर्दशमेशशीच योगेत्रयातस्यनपृष्ठतोन्येबलेनहीनस्यबलान्वितोपि ८ अथा
न्ययोगांतरमाह गुरुरुदयेरिपुराशिगतोर्कोयदिनिधनेचनशीतमयूखः भवतिगतोत्रशशीवनरेन्द्रोरिपुवनिताननतामर
सानां ९ गुरुर्जीवउदयेलग्नेरिपुराशौषष्ठेगतोर्कःसूर्यः निधनमष्टमस्थानंवर्जयित्वान्यस्मिन्नन्यत्रशुभस्थानेस्थितःशीतम

पंक्तानि

यूखश्चन्द्रः तत्रास्मिन्नेवंयोगेगतोयातोनरेन्द्रोराजा शत्रुनायिकामुखकमलानांशशीचन्द्रइवभवति उद्भाताच्छत्रवनितानांमु
खमंकोचयति तथाचवादरायणः गुरुर्विलग्नेरिपुराशिगोर्कोनचाष्टमेशीतमयूखमाली गतोत्रयोगेरिपुकामिनीनांवक्त्रा
रविन्दुशशिन्वमेति ९ अन्यदपियोगांतरमाह शुक्रवाक्पतिबुधैर्भृगुगुरुशशिभिर्निधनसंस्थैःसप्तमेशशिनिलग्नगतेर्के निर्गतोनृपतिरेतिक
तार्थोवनेतेयवदरीन्विनिघृष्य १० शुक्रवाक्पतिबुधैर्भृगुगुरुशशिभिर्निधनसंस्थैःलग्नाद्द्वितीयस्थानेस्थितैः शशिनिचन्द्रेसप्त
मस्थेलग्नगतेर्केरवौ अस्मिन्योगेनृपतिः राजायात्रायांनिर्गतोयातः कृतार्थःसन्निष्टकार्यःस्वभवनमेत्यायाति किंकृत्वावेन
तेयवदरीन्विनिघृष्य वेनतेयोगरुडः प्रतीन्कादृवेयान्विनिघृष्यव्यापादयित्वागच्छतीति तथाचवादरायणः लग्नात्सप्तमस्थो
रविरात्रिनाथोजीवज्ञशुक्राश्चकुजेभसंस्थाः योगेत्रयातस्यपरःप्रयातवीर्यान्वितोप्याशुबलंप्रयाति १० योगांतरमाह भूमि
विनसहजेषुसंस्थिताः शुक्रचन्द्रसुतनिग्मरश्मयः यस्ययानसमयेरणनलेतस्यपोतिशलभारवारयः ११ लग्नद्वितीयतृती
यस्थानेषुयथाक्रमंभृगुशशिसुतसूर्याःसंस्थिताभवंति तत्रैतज्ज्ञानं लग्नेभृगुः द्वितीयेबुधः तृतीयेसूर्यः एवंविधोयस्यरा
ज्ञोयानसमयेयात्रायोगोभवति तस्यारयःशत्रवोरणानलेसंग्रामाग्नौयांत्यपिगच्छंत्यर्थः शलभारवयान्यनाशकराःप्रसि
द्धाः तेयथाशांत्यादौक्षतेसतिभस्मसाद्यांतीति तथाचवादरायणः लग्नद्विदशिकगतैःक्रमेणशुक्रेन्दुजार्कैर्नृपतेर्नयःस्या
त् १४ अन्यदपियोगांतरमाह सूर्येन्दुबलवर्जितोबलयुतोजन्मेशलग्नेसरोपातालेदशमेपिवाशशिसुतोलग्नस्थितोवाक्प

निः षट्सप्ताष्टमवर्जितेषु भृगुजः स्थानेषु यस्य स्थितो यातस्तस्य नव विद्विषो रणमुखे निहंति योषाश्व १२ सूर्येन्दूबलवर्जितौ च
लग्नेशतनयेस्थाने दिक्कालवेलाचेष्टाविनवर्जितौ जन्मेशलग्नेशौ बलयुतौ यत्र राशौ स्थितेचन्द्रमसि पुमान्जातस्तत्रत्रयः स्वामी
ग्रहः सलग्नेशः पतौ जन्मेशलग्नेशौ बलवतनयसहितौ शशिनो बुधश्चतुर्थस्थाने दशमे मेषरणे वा स्थितौ वा कवितिर्गुरुः
लग्ने भृगुजः शुक्रः षट्सप्तमाष्टमवर्जितेषु त्रिषु स्थानेषु वर्जयित्वा अन्यस्थाने स्थितः यस्य यातर्जिगमिषुरेवं विधो योगो भवति
तस्य विद्विषः शत्रवः संग्रामे योषाश्व वनितिर्हंति संमुखानभवंतीत्यर्थः कर्कराशेः कर्कटलग्नस्य जातस्य वा सिंहराशेः सिंहल
ग्नस्य वा योगा एषनोपपद्यते यस्मात्सूर्येन्दूबलवर्जितौ लग्नेशजन्मेशौ चिंतावेव बलवंतौ ज्ञेयौ तस्मात्तयोर्हीनबलत्वं च संभ
वति तथा च वादरायणः जन्मोदयेशौ बलसंप्रयुक्तौ बलेन हीनौ दिनरात्रिनाथौ सप्ताष्टषष्ठान्परिहृत्य शुद्धे चन्द्रात्तनेक
र्मणि लग्नगो वा जीवे विलग्नेद्विगतस्य शत्रुर्युद्धे समाप्ताद्यदिशः प्रयातीति १२ अन्ययोगांतरमाह सौरे भौमे लग्नगे कर्कवम
ध्ये कर्मण्यायेभार्गवे चन्द्रजे वा यायाद्भूपः शत्रुदेशं निहंतुं दृप्तेशत्रुं कालवत्क्रूरचेष्टः १३ सौरे भौमे वा लग्नगे दृप्तत्रयाशहः स
मुच्चयार्थे सौरः शनिः भौमो मंगारकः पतौ लग्नगतौ अर्कश्चादित्यस्तस्मिन्नवमध्ये दशमस्थे कर्मस्थाने दशमे आयमेकाद
शे भार्गवः शुक्रः चन्द्रजो बुधः दशमे एकादशे वा स्थाने बुधः तत्रैव शुक्रः तस्मिन्योगे भूपालो राजा शत्रुदेशं नाशयितुं याया
त् दृप्तं धर्मिष्ठं शत्रुं निहंतुं याया त् कीदृशो राजा कालवत्क्रूरचेष्टः मृत्युवत्क्रूरदर्शनः तथा च वादरायणः दशमे काद

शगतौ सितज्ञौ लग्नोपगौ भूमिसुतार्कपुत्रौ रविर्नभस्थोपि रिपून्निहंति राजा व्रजेन्मृत्युविरोधचेष्टः तथा च मयः कुजसौरौ ल
ग्नगतौ सूर्यश्चाभ्रे बुधसितौ वा लग्ने लाभे वरेण्यान्तर्नाशयति शत्रुवर्गं १३ अन्ययोगांतरमाह लाभशत्रुसहजेषु यमारौ
सौम्यशुक्रगुरवो बलयुक्ताः गच्छतो यदि ततो स्य परित्रीसागरांबुरशनावशमेति १४ लाभमेकादशस्थानं शत्रुस्थानेष
ष्ठं सहजस्थानं तृतीयं एतेषां स्थानानां मध्ये यमारौ यमः शनिरारो भौमः तथा सौम्यशुक्रगुरवः सौम्यो बुधः शुक्रः प्रसिद्धः
गुरुर्जीवः एते यत्र यत्र स्थाने बलयुक्ताः सबलाः एवं विधो योगो यदि गच्छतो नृपस्य भवति ततस्तस्मिन्नेव काले नृपस्य परित्रीसप्त
द्वीपलेन परिवीक्षितावशमेति तथा च वादरायणः बलान्विता भार्गवचन्द्रजीवा लाभारिहिबुकगतो यमारौ यथा तथा भू
मिपतिर्गतोपि करोति वशं पर्वसुखोपसमग्रो १३ अन्यदपि योगांतरमाह पापास्तृतीये हिबुके सितज्ञौ जीवो विलग्नेमृगलोच
नोस्ते यस्योद्यमे तस्य बलैरिपूणां कृतेकृतघ्नेषु विषानिनाशं १४ पापाश्चादित्यांगारकशनैश्चरास्तृतीयस्थानस्थाः हिबुके
चतुर्थस्थाने सितज्ञौ बृहस्पतिर्विलग्ने मृगलोचनश्चन्द्रोस्ते सप्तमभवने एवं विधो योगो यस्योद्यमनकाले यात्रायां तस्य शत्रुव
लं क्षयमुपगच्छति यथा कृतघ्नेषु उपकारादिकृतं नाशं याति तथा च वादरायणः त्रिसप्तदशिकजलाद्यवंयुतृतीयसंस्थैः क्र
मशो ग्रहेन्द्रैः रणस्य नाशं समुपैति शत्रुः कृतेकृतघ्नेषु विषं भूमिपस्य १५ अन्ययोगांतरमाह चन्द्रेस्तगे देवगुरौ विलग्ने शुक्रज्ञयोः
कर्मणि लाभगे वा सौरारयोर्भ्रातृगयोश्च यात्रा नृपः स्वभृत्यानिव शास्ति शत्रून् १५ चन्द्रे सप्तमगे देवगुरौ विलग्ने शुक्रज्ञयोः

यो या
टी
३०

कर्मणि इतोवधः शुक्रः प्रसिद्धपतयोः कर्मणि दशमे स्थाने स्थितयोः अर्के लाभगे शनिभौमयोस्तृतीयगतयोः एवं विधे गतो राजा श
त्रून् रिपून् स्वभृत्यानि वशान्ति शासत्यत्र शिष्टो तथा बादरायणः लाभास्तद्भिक्षा वेलग्नकर्मतृतीयसंस्थैर्दिनकृत्क्रमेण सर्वे
ग्रहेन्द्रैर्यदि यातिराजा तदा स्वभृत्यानि वयानि शत्रून् १५ अन्यदपि योगांतरमाह गुरौ विलग्ने यदि वा शशांके षष्ठे रवौ कर्मगते
र्कपुत्रे सितज्ञयोर्वा पुसुतस्थयोश्च यात्रा जनिजीवहितान्विधत्ते १६ गुरौ लग्नस्थे चन्द्रे लग्नस्थे वा रवौ षष्ठे अर्कपुत्रे शनैश्चरे द
शमस्थे सितज्ञयोर्वा पुसुतस्थयोः एतेन चतुर्थे शुक्रः पंचमे बुधः एवं विधे योगे यात्रा दत्ता मातेव हितानि करोति बादरायणः
लग्ने जीवस्तद्भृतचंद्रमा वा षष्ठे सूर्यः कर्मगः सूर्यपुत्रः वन्धौ शुक्रः पंचमे चन्द्रपुत्रो योगे यात्रा मातृवत्प्रहिताय अत्र चके
बिद्धादशश्चार्थे वदंति तथा च यात्राकाले वीरदत्तः लग्ने गुरुः शशिसुतः सूर्यः षष्ठे तथा वैरसौरः सुतहिबुकयोर्न शुक्रो
सहि शत्रुक्षयावहो योगः १६ अथान्यद्योगांतरमाह पत्यौ गिरौ लग्नगते वशेषैरेकादशार्थोपगतैर्ग्रहैः विदार्यते शत्रुव
लं समंताद्भीमो यथाद्रेतशतैर्युगांते १७ गिरौ पतिर्जीवः तस्मिंल्लग्नगते शेषैर्जीववर्जितैर्ग्रहैरेकादशार्थोपगतैर्लाभस्थानथन
स्थानोपगैः एतत्स्थानद्वयं वर्जयित्वान्यत्र क्रूरा चिंत्यंते तयोः स्थानयोरेकैकस्मिन्स्थाने द्वयोर्वा स्थितैः एवं विधे योगे गतस्य
राज्ञः शत्रुबलं समंताद्विदार्यते यथा युगांते कलियुगांते द्रेतशतैस्तर्कतोपन्यासैः धर्मो विदार्यते तथा च बादरायणः लग्ने गु
रुर्भद्रपदे द्वितीयस्थाने विनानास्ति तथा ग्रहोन्यः शत्रुर्गतस्याथ विनाशमेति धर्मो यथा प्राप्य युगं चतुर्थे १७ अन्यदपि योगां

३०

तरमाह त्रिषष्ठनवांत्येषु बलः शशांकश्चान्द्रिर्बलीगस्य गुरुश्च केन्द्रे तस्यारियोषाभरणैः प्रियाणि प्रियः प्रियाणां जनयेति सै
न्ये १८ तृतीयषष्ठनवमद्वादशस्थानानामन्यतमस्थानस्थश्चन्द्रः सबाबलो बलरहितः तेषामेव स्थानानामन्यतमस्थानस्थि
तः एवं विधो योगो यात्रागमने यस्य भवति तस्य सैन्ये ये सैनिकाः प्रियाः पुरुषाः प्रियाणां च स्वस्त्रीणां मरियोषाभरणैः शत्रुस्त्री
णामाभरणैः प्रियाणि हितानि कुर्वंति शत्रुस्त्रीणामलंकाराण्यानीय स्वस्त्रीणां दत्वा स्वस्त्रीः प्रीतिमाप्नुवंतीत्यर्थः तथा च बादरा
यणः शशांकस्तिमस्थो विबलः शशांकस्तस्थो हिमांशोस्तनयो बलीयान् केन्द्रे गुरुस्तत्रगतो रिरत्नैः करोति चाहूनि विला
सिनीनां १९ अन्यदपि योगांतरमाह केन्द्रोपगते नवीक्षिते गुरुणा त्र्यायचतुर्थगे सिते पापैरनवाष्टसप्तगैर्वसुकिंतत्रय
दाम्रयाङ्गतः १९ तृतीयमेकादशं चतुर्थं प्रसिद्धं सिते शुक्रे त्र्यायचतुर्थगे तृतीयैकादशचतुर्थस्थानानामन्यतमस्थान
स्थे तस्मिंकिंभूते केन्द्रोपगते नगुरुणा दीक्षिते चतुष्टयगते न जीवेन निरीक्षिते तथा पापैरविभौमशनैश्चरैः नवमाष्टमस
प्तमस्थानानि वर्जयित्वान्यत्र यत्र तत्रस्थैरेवं विधे योगे गतो राजा किंतद्दासकिमन्यद्वनं यत्राप्नुयात् अपि तत्सर्वमेव किंचित्त्रय
नेलोके विद्यते यन्न लभते इति तथा च बादरायणः लग्नाद्गुरुः केन्द्रगतस्तु पश्चे त्रिलाभवेश्मोपगते सिते तत् सप्ताष्टधर्मेषु परिहृ
त्यपापैर्यातेः प्रयातर्विजयो ध्रुवं स्यात् १९ अन्यदपि योगांतरमाह लग्नारिकर्मनिधनेषु शुभैर्वितेषु त्रीणीत्यलग्नहिबुकेषु शु
भग्रहेषु यातर्भयं भवति न प्रतिवेत्सशुद्धं यद्यश्मनापि किमुतारिसमागमेषु २० लग्ने प्राप्ते अरिस्थाने षष्ठे कर्मदशमे हिबु

कंचतुर्थपतेर्वास्थानानामन्यतमस्थानेबुधेनसिंहशुभेक्षितेबुधेचतसिंहशुभेक्षितेशुभग्रहदृष्टे तथासप्तमद्वादशप्राप्तस्था
नेवर्जयित्वान्यस्थानेशुभग्रहेषुरविभौमशनैश्चरेषु एवंविधयोगेयातगतस्यभयंनभवति यदिसमुद्रमध्यमनापतेत् किं
पुनर्गृहेसंस्थितेज्ञेदृष्टेशुभैर्गुणविलग्नरिपुस्थानं त्यक्त्वास्थितैःसौरदिवाकरारैर्विभीःसपत्नान्प्रणदत्ययत्नात् २० अन्यदपि
योगांतरमाह यस्योदयात्सारिचतस्त्रिसंस्थाःशुक्रांगिरोंगारकसौम्यसौराः द्विषद्बलस्त्रीवदनानितस्यक्रांतानिकांतानवलो
कयंति २१ उदयेलग्नं अस्तेसप्तमं रिपुस्थानंसष्ठंचतुर्थंतृतीयं एतेषुस्थानेषुयथासंख्यंस्थिताः केते शुक्रांगिरोंगारकसौम्य
सौराः तेनैतज्ज्ञातं लग्नेशुक्रःसप्तमेजीवः षष्ठे भौमः चतुर्थेबुधः तृतीयेशनिः एवंविधयोगोयस्यगमनेभवति द्विषद्बल
स्त्रीवदनानि द्विषद्बलेशत्रुबलेसैन्येयेसैनिकाः तेषांस्त्रियस्तासांमुखानितानिक्रांतानिदीनानिकान्तान्वलयानवलोकयंति
दीनैःशत्रुसेनावदनैर्निनाःप्रियादर्शनंदद्यति तथाचबादरायणः लग्नारिसप्तमांबुतृतीयसंस्थैःशत्रुज्ञवागीशकुजार्कपुत्रैः
यातस्यपश्यंतिविलासनीनांदृष्टानिवक्त्राण्यरिसंगनार्यः २१ अन्यदाह पूर्वोक्तयोगेधनगोबुधश्चशशांकसूर्यौचदशायसं
स्थौ अस्मिन्नातस्यात्रिकलोपगीतानानावनोत्थाद्विरदाभवंति २२ अस्मिन्नेवपूर्वोक्तेप्राक्कथितेयोगेधनगोबुधः द्वितीयस्था
नगोबुधोभवति शशांकसूर्यावेतौदशायगौ दशमेचन्द्रः आर्यसूर्यः शेषंसामान्यं तत्रैतज्ज्ञातं लग्नेशुक्रः सप्तमेजीवः ष
ष्ठेभौमः तृतीयेशनिर्द्वितीयेबुधः दशमेचन्द्रः एकादशेरविः एवंविधयोगे गतस्यराज्ञः नानावनेषुज्ञाताद्विरदाद्दस्तिनोभ

वंति किंभूता अलिकुलोपगीताः भ्रमरसमूहेनसमीपेगीतंक्रियते येषांतथाभूताः बादरायणः सूर्यादयोभद्रपदोवराणि
वितास्तलग्नेसहजोपगाःस्युः योगेत्रयातस्यमतंगजानामिर्भवत्ययत्नेननराधिपस्य २२ अन्यदप्याह सूर्यादयोरिसहजोव
रशत्रुलग्नेवन्धायगाःसुरगुरोर्दिवसश्चयस्य यानेरिसैन्यमुपगच्छतितस्यनाशंमीमांसकश्रवणकेश्वितीर्थपुण्यं २३ सू
र्यादिग्रहाःषष्ठतृतीयदशमाःशत्रुलग्नवतुर्थलाभस्थानस्थाःतत्रैतज्ज्ञातं आदित्यःषष्ठेचन्द्रस्तृतीयेभौमोदशमे बुधःष
ष्ठे जीवोलग्नेशुक्रश्चतुर्थेशनैश्चरएकादशे एवंविधयोगोयात्रायांयदिभवति तदासुरगुरोर्जीवस्यदिवसोभवति बृह
स्पतिवारइत्यर्थः तस्यारिसैन्यंशत्रुसैन्यंनाशमुपगच्छति यथामीमांसकेषुश्रवणेषुवेदेषुतीर्थपुण्यंनश्यति तथाचबा
दरायणः अरातिदृश्चिकाद्यशत्रुलग्नवतुर्थलाभोपगतैःक्रमेण सूर्यादिभिर्जीवदिनेगतस्यनश्यंतिसर्वेसहसासपत्नाः २३
अन्यदपियोगमाह त्रिनिधनतत्रसप्तमारिसंस्थाःकुजसितजीवबुधारविश्चयस्य खलजननमनिंतेवयोगयात्रानभवतित
स्यचिरायशत्रुसेना २४ तृतीयाष्टमतत्रसप्तमषष्ठाःएतेषुयथासंख्यंस्थिताःकेते कुजसितजीवबुधाः तत्रैतज्ज्ञातं कुज
स्तृतीयेशुक्रोष्टमेबृहस्पतिर्लग्नेबुधःसप्तमेरविरेकादशे एवंविधयोगोयात्रायांयस्यभवति तस्यरिपुसेनाचिरायनभवति
चिरेणनिष्टति यथाखलजनिताकुजनोत्पादितालोकेपोगयात्रामैत्रीखलजनसंगतिमित्यर्थः साचिरायनभवतिनहृदि
ति तथाचबादरायणः जीवोलग्नेसप्तमश्चन्द्रपुत्रःसूर्योलाभेभूमिपुत्रस्तृतीये रन्ध्रेशुक्रोयस्ययोगेत्रजेनतस्यारातिर्नीश

मा भुप्रयाति २४ अन्ययोगांतरमाह कुजरविभ्युतेरिभेगतानांजलसहजोपगतैःसितार्कजीवैः परबलमुपयातिनाशमाशु
शुक्रतमधनस्यकुटुंबचिंतयेव २५ भौमशनिसंयुक्तेषष्ठस्थाने जलेचतुर्थस्थानेसहजेतृतीये अन्ययोरुपगतैःप्रोक्तैःसितार्क
जीवैः शुक्ररविबृहस्पतिभिः अत्रैतज्ज्ञातं भौमशनेश्चरौषष्ठेचतुर्थेतृतीयेवाशुक्रः तत्रैवार्कजीवौ एवंविधयोगेगतानांप
रबलंशत्रुबलंशीघ्रमेवविनाशमुपयाति यथाधनस्यदरिद्रस्यबहुमातापितृपुत्रकादिकुटुंबचिंतयाशुक्रतेशास्त्रेना
शंजनति बादरायणः शुक्रार्कजीवाःसहजेजलेवायथातथाशत्रुगृहेर्कभौमौ योगेत्रयातस्ययथामलस्यविद्येवनाशं
प्रतिपद्यतेरिः २६ अन्यदपियोगान्तरमाह लग्नत्रिथर्मारिदशायगेषुसितार्किजीवेन्दुकुजेन्दुजेषु सार्केवुधेचारिबलंविना
शमायातिगुरौपिशुनेष्विवोक्तं २६ लग्नतृतीयनवमदशमैकादशस्थानेषुस्थितःशुक्रः आर्किःशनैश्चरः जीवोबृहस्पतिः
इन्दुश्चन्द्रः कुजोभौमः इन्दुजोबुधः वुधसार्केर्कसहिते आदित्यसंयुक्ते तत्रैतज्ज्ञातं लग्नेशुक्रः तृतीयेशनिः नवमेजीवः
षष्ठेचन्द्रः दशमेभौमः एकादशेबुधः तत्रैवरविः एवंविधयोगेगतस्यशत्रुबलंनाशमुपयाति यथागुरौरहस्येपिशुनेबृ
र्कंनाशमुपगच्छति तथाचबादरायणः लाभारिवैकादशथर्मलग्नतृतीयगैःसूर्यमुखेर्गतस्य रहस्यमुर्कंपिशुनस्ययद्वत
पारिसैन्यंप्रसभंविनाशं २९ अन्यदप्याह एकांतरर्क्षेभृगुनाकुजाद्वासौम्येस्थितेसूर्यसुताद्गुरौवा प्रध्वंसतेरिर्नविराद्गत
एकृष्णाधिकोभृत्यदरेश्वरण २७ भृगुनाच्छुक्रादंगारकाद्वौमात्सौम्येबुधे एकांतरर्क्षेगतेएकषट्कंराशिमंतरंकृत्वा अथ

वासूर्यसुताच्छनैश्चराद्गुरोर्वानीचात् एकांतरर्क्षेसौम्येस्थिते एवंविधयोगेगतस्यनचिराच्छीघ्रमेवशत्रुर्विनश्यति यथे
श्वरस्यप्रभोःसकाशाद्भृत्यःकृष्णाधिकः ईश्वरेणेवप्रध्वंस्यते विनाश्यते तद्वद्गतस्यारिःप्रध्वंस्यते तथावादरायणः बु
धस्तृतीयेरविनात्कुजाद्वाबृहस्पतेर्भार्गवनन्दनाद्वा प्रयाणकालेनृपस्ययस्यतस्याशुशत्रुःप्रविनाशमेति २९ अथा
न्ययोगांतरमाह निरंतरंयदिभवनेषुपंचसग्रहाःस्थितादिवसकरेणवर्जिताः यियासतोयदिभवतिष्टतस्तदाबलान्व
लभिदिवावक्रतति २० तेषुपंचसपंचसभवनेषुपंचसगृहेषुपंचपवग्रहाःस्थितानिरंतरमंतरंवर्जयित्वा कीदृशाग्रहा
रविवर्जिताः तेषांमध्येनकेनचित्सहितआदित्योभवति तेचसर्वएवयियासोर्जिगमिषोर्यदिष्टतःष्टवर्तिनोभवंति य
था अपरकपालस्थैःपूर्वादिशंगच्छतः मध्याह्नस्थैरुत्तरां अर्धरात्रस्थैर्दक्षिणां एवंस्वयियाचान्ययोविदिक्स्वष्टसंदति
तदेवंविधयोगेगतोराजापरांशात्रून्बलिभिर्दिन्द्रवावक्रन्नतिनाशयतिइत्यर्थः बादरायणः निरंतरंपंचसचेद्गृहेषुग्र
हाःस्थिताःपंचनवार्कयुक्ताः यातस्यष्टोपगताभवंतियातापरान्हन्यसुरानिवेन्द्रः २१ अन्ययोगांतरमाह एकांत
रार्यदिगताभवनेषुषट्सष्टस्थितश्चसुरशत्रुगुरुःप्रयाणे यातस्यनात्रारिपवोविषहंतिवीर्यविलोरिवोद्यतगदारथपा
दपाणेः २८ सर्वएवग्रहार्यदिषट्सभवनेषुषट्सराशिषुयदिएकांतरगताःएकमेवराशिमंतरंकृत्वास्थिताः लग्नेतृती
येपंचमेसप्तमेनवमेएकादशस्थानेसर्वएवग्रहाभवंति एतानिस्थानानिशून्यानिभवंतिशेषाणिशून्यानि यथासुरश

जगुरुः शुक्रः सचयातर्यात्रासमयेपृष्ठतःपृष्ठवर्तीभवति तदायोगोपृष्ठवर्तिन्येव शुक्रेद्वितीयचतुर्थषष्ठाष्टमदशम
द्वादशस्थानानिशून्यानिभवंति तदापरोयोगः अस्मिन्योगेयातस्यनृपस्यशत्रवोवीर्यबलेनविषहन्तेनसहन्ते यथावि
ष्णोर्भगवतोनारायणस्यसमुद्यतगदारथपादपाणेः समुद्यतागदाकौमुदकीरथपादचक्रंसुदर्शनंपाणिपाद्मस्तयोर्यस्य
अस्मिन्योगेवादरायणःपृष्ठवर्तितांशुक्रस्यनपश्यति तथाचवादरायणः चक्रेप्रयातस्यनरेश्वरस्यनजानातचक्रंप्रतिचा
नमेति समुद्रयातस्यसमुद्रमुद्रायिताभूर्वशमेतिशीघ्रं २५ अन्ययोगांतरमाह भृगुपुत्रमहेन्द्रगुरुगमनेसहितो
यदिभंयुगपत्पतनतः जगुरुयदिवांशकमेकगतोसमरेमरराडिवभातितदा ३० भृगुसुतःशुक्रः महेन्द्रगुरुर्जीवः एतावे
कराशियुगपत्तुल्यकालंयदित्पतनतः परित्यजनतः अथवाजगुरु बुधबृहस्पतीयद्येकमेवांशंगच्छतः तस्मिन्कालेगतोरा
जासंग्रामेमरराट्इन्द्रइवशोभते तथाचवादरायणः एकंगृहंदैत्यसुरेन्द्रपूज्योत्यक्त्वायदन्यंव्रजतःसमेतौ तदाप्रयात
स्यनरेश्वरस्यशक्रेणतुल्यत्वमुपैतिवीर्यं राशावथैकत्रसमांशकस्योजीवेन्दुपुत्रौव्रजतोभवेतां तस्यारिसैन्यंप्रविदारमे
तिवातार्पितानौरिवतोयमध्ये ३० अन्ययोगांतरमाह निस्त्रिंशवक्रोपगतेचवक्रेवक्रेणवक्रंनृपतिंविहन्यात् पानप्र
सक्तंनिशिवाप्रसुप्तंतस्यैवचास्तेयदिवांशकःस्यात् ३१ वक्रेंगारकेनिस्त्रिंशवक्रोपगतेनिस्त्रिंशवक्रेनिवेशमाने तथा
च असिमुसलेसप्त दशाष्टादशतोपिवेति तथैवचभौमस्यसंवेधिनवांशकेतत्कालमस्तमयंप्रतिपन्ने तात्कालिकाह्न

३३

पानप्रसक्तंनिशिवाप्रसुप्तं
इतिक्रियोपलक्षणं

शांशकात्सप्तमस्थानगतेमेषांशकेवृश्चिकांशगतेवाराजावक्रेणमार्गेणवक्रमयर्मशीलंनृपतिंराजानंविहन्यात् तंचपा
नप्रसक्तंमद्यपानरतंनिशायांरात्रौप्रसुप्तंवालभ्यते एतदुक्तंभवति तस्मिन्कालेराज्ञाशत्रोःपानप्रसक्तस्यनिशिवाप्रसुप्त
स्यावस्कन्दोदेयइति तथाचवादरायणः निस्त्रिंशवक्रोपगतेमहीजेभौमांशकेचास्तमयंप्रपन्ने राज्ञाप्रमत्तस्यरिपोःप्रमत्तः
कुर्यादवस्कन्दनमत्रयोगे ३१ अन्यदपियोगांतरमाह पुत्रोथरिज्यादिनकृत्सतश्चयदात्यजेतांयुगपत्नवांशे तदाह्यवस्कन्द
रतोनरेन्द्रोभुंक्तेरिपूंस्तार्क्ष्यइवद्विजिह्वान् ३२ यरिज्यीपुत्रभृगारकःदिनकृत्सतःशनैश्चरः एतावेकस्मिन्राशौएकमंशकं
यदायुगपत्तुल्यकालंत्यजेतांतदातस्मिन्कालेगतोराजा अवस्कन्देनगतोरिपूच्छत्रुंभुंक्ते यथातार्क्ष्योगरुडोद्विजिह्वान्स
र्पान्भुंक्तेभ्रांतितद्वदिति तथाचवादरायणः एकंयदांशंयुगपत्प्रपन्नौराशावथैकत्रकुजार्कजौवा तदाह्यवस्कन्दगतोन

भुंक्ते.

रेन्द्रोरिपूंस्तार्क्ष्यइवद्विजिह्वान् ३२ अथान्ययोगांतरमाह बुधभार्गवमध्यगतेहिमगौहिबुकोपगतेनृपतिःप्रवसन् पुरु
हूतदिशंयदिवांतकृतःपुरुहूतयमप्रतिमोभवति ३३ हिमगौचन्द्रेबुधभार्गवमध्यगतेबुधशुक्रयोर्मध्यस्थेचतुर्थस्थान
स्थिते तेनेतज्ज्ञातं बुधस्तृतीयेशुक्रःपंचमे अथवाशुक्रस्तृतीयेबुधःपंचमेतन्मध्येचंद्रमाश्चतुर्थे एवंविधेयोगेनृपतिःराजा
प्रवसन्नाक्रन्पुरुहूतदिशंपूर्वांयदिवान्तकृतोयमस्यदक्षिणांदिशं नान्यदिक् अस्मिन्योगेपूर्वांदिशंगतोराजारिपूणांपु
रुहूतप्रतिमइन्द्रइवभवति दक्षिणांचदिशंगतोयमप्रतिमइतिविभाति वादरायणः पुत्रोबुधश्चिकांगतेःक्रमेणवृश्चिका

तोयात्मजसंहितेर्वा बुधेन्दुशुक्रैर्यमशक्रनाथकाष्ठाप्रयातस्यजयःप्रदिष्टः ३२ अन्यद्योगांतरमाह सितेन्दुजौचतुर्थगो
निशाकरश्चसमसे यदातदागतोनृपःप्रशास्त्यरीन्विनारणात् ३४ सितःशुक्रःइन्दुजोबुधः एतौचतुर्थस्थानस्थौ निशा
करश्चन्द्रःसमसे एवंविधोयोगोयदाभवति तदास्मिन्कालेगतोराजाशत्रूंसंग्रामाद्विनाप्रशास्तिजयति ३४ अन्यद्यो
गांतरमाह शशिनिचतुर्थगृहेसमुपेतेबुधसहितेस्लगतेभृगुपुत्रे गमनमवाप्यपतिर्मनुजानांजयतिरिपूक्षम [illegible]
विनैव ३५ शशिनिचन्द्रमसिचतुर्थस्थानस्थे तथाभृगुपुत्रेबुधसहितेस्लगतेसमसमस्थानस्थे एवंविधेनयोगेनमनुजपतिः
राजागमनंयात्रामवाप्ययुद्धेनविनैवशत्रून्जयति रिपूंश्चाशयतीत्यर्थः तद्वद्योगद्वयंवादरायणआह इन्दावस्लेसौम्य
शुक्रौचतुर्थौवन्धौचन्द्रेसमसमस्थौसितज्ञौ स्यातांराजस्लत्रयातस्यभीतःशत्रुर्युद्धेयुद्धमार्गेनयति ३५ अन्यद्योगांतरमा
ह क्षितितनययुतानवांशकाद्यदिशतमेत्यकुजोथवागुरुः शतगुणमपिहंत्यरेर्बलंविषमिवकायमसृक्पथोपगं ३६
यस्मिन्नवांशकेक्षितितनयोंगारकस्थितःसक्षितितनयपुतोनवांशकस्तस्मात्तथाभूताद्यदिशतमेनवांशकेशुक्रःस्थि
तोभवति अथवागुरुर्बृहस्पतिर्भवति तदारिपोःशत्रोःशतमपिबलंहंतिमारयति यथाविषमसृक्पथंप्राप्यशतगुणम
पिकायंशरीरंनिहंति तथाचवादरायणः शुक्रोमहांस्तेननवांशकस्थेसुरेज्यपुत्र्याद्यदिवागतोत्र शत्रोर्बलंहंतिमहान्त
माप्तयथाशरीरंविषमौषधस्तु ३६ अन्यद्योगांतरमाह शतांशकाद्ध्वमथःस्थितेबुधेयमारयोस्तत्रगतस्यभूसुतः प्रया॰

तिनाशंसमरेद्विषद्बलंयथार्थिभावोपगतस्यगौरवं ३७ बुधेयमारयोःशनिभौमयोःएतयोःसकाशाद्बुधेशतांशकाद्ध्वं
व्यवस्थितेसति एतद्वक्रंभवति अंगारकोयस्मिन्नवांशकेव्यवस्थितः तस्मिन्शनैश्चरोव्यवस्थितः तयोर्द्वयोरपिनवांशक
योःसकाशान्नवांशकशताद्ध्वंयदिबुधोव्यवस्थितोभवति तत्रतस्मिन्कालेराज्ञोगतस्ययात्रायांशत्रुबलंनाशंप्राप्नोति
यथार्थिभावोपगतस्य अर्थितामुपगतस्यगौरवमिति तथावादरायणः नवांशकश्चेत्रवमादधोनोस्यातांबुधाद्भास्करि
भूमिपुत्रौ गतोत्रराज्ञारिबलंनिहन्तियथार्थिताहंतिनरस्यतेजः ३७ अन्यदाह नक्षत्रमेकंयुगपत्प्रविष्टौयदाथरिंवीत
नयामरेज्यौ ऊयात्तदेतद्विषतांबलस्यद्वौणिर्यथोर्वीनिशिसोमिकेन ३८ परिवीतनयौभौमःअमरेज्यौबृहस्पतिः एतौ
युगपत्स्वकाले एकनक्षत्रेप्रविष्टौभवतः तदातस्मिन्कालेगतोराजाद्विषतांसौमिकेनांतंकुर्यात् समाप्तिंहंतीत्यर्थः
यथाद्रौणिर्द्रौणपुत्रोश्वत्थामा अरेर्बलस्यपृथिवीरसंवर्धिनःसौमिकेनांतंनिशिकृतवानित्यर्थः ३८ अन्यद्योगांतरमाह
ऋक्षेगुरुज्ञौबुधभार्गवौवायदाप्रविष्टौयुगपत्समेतौ अर्थानवाप्नोतितदाविचित्रान्शत्रोःसशास्त्रान्गुरुपूजनेयव ३९ गु
रुर्जीवः ज्ञौबुधः एतावृक्षेनक्षत्रेयुगपत्स्वकालेसमेतौ द्वावपिसंयुक्तौ एकस्मान्नक्षत्रादन्यनक्षत्रेप्रविष्टौ अथवाबुध
भार्गवौ एतावपियुगपद्द्वाभ्यांनक्षत्राभ्यांसमेतौप्रविष्टौ यदायस्मिन्कालेतदातस्मिन्कालेगतोराजा अर्थान्धनान्विचि
त्रान्नानाप्रकारानाप्नोति यथाशास्त्राशिष्यः गुरुपूजनेयेवाचार्याभ्यर्चनेनसशास्त्रान्शोभनशास्त्रान्प्राप्नोति एतद्योगद्वये

वादरायणाग्राह जीवावने यौवुथभार्गवौवाजीवेकुजोवायुगपत्रविष्टौ नतत्रमेकंनृतदानंरेद्रःकुर्यादवस्कन्दमरा
तिसैन्ये ४३ अथयोगभंगानाह यात्रादिगीशात्रादिपंचमेस्थेग्रहेग्रहेवीर्ययुतोवतिष्ठेत् समद्यताशाकथितानि।
भङ्गानिवलानिवीर्याज्जयतिस्वकाष्ठाम् ४४ यादिशंराजागंतुमिच्छतितस्यादिशियोधिपतिः सयात्रादिगीशःसच
यस्मिन्राशौव्यवस्थितः तस्माद्यद्यन्यश्चेद्ग्रहोवीर्ययुतोवलवान्पंचमस्थानेवतिष्ठेद्भवति तस्मात्समद्यताशाकथिता
निफलानिभङ्गानिविनाश्रपसग्रहोवीर्याद्वलात्स्वकाष्ठामात्मीयादिशंनयति एतद्वक्तंभवति यादिशंराजागंतुमि।
च्छतितंनगच्छतिकथम् योसौग्रहोदिगीशात्पंचमेस्थानेस्थितः तस्यादिक्तेनग्रहेणतांदिशंबलान्नीयते तथाबा
दगादिगीश्वरात्पंचमगोबलीयान्ग्रहःस्वकाष्ठांनयतिप्रसद्य ४४ अन्यद्योगांतरमाह एकोपिजीवत्तसितासितानां
कुजात्रिकोणेरवितोथवेंद्रः यत्रैतितस्तत्रनयातियातातयोर्बलीयान्नयतिस्वकाष्ठाम् ४५ सूर्यआदित्यःजीवुथः
सितःशुक्रःअसितःशनिः एतेषांमध्यादेकोग्रहःकुजादंगारकाद्यत्रिकोणेनवपंचमेवास्थानेभवति अनयो
रेकतमेतदर्थातायत्रोद्यतेगंतुंप्रवर्तः तस्यादिशितांदिशंमनसीप्सितांनगच्छति तयोर्मध्याद्योबलवान्सस्वकाष्ठा
मात्मीयांदिशंनयति यदिभौमोबलीयंस्तदातस्यादिक्तेंगच्छति अथभौमेबलवति दक्षिणांदिशंगच्छतोनायंयो
गभंगः भौमात्त्रिकोणस्थेबलवति तदिशंगच्छतश्च रवितोथवेंद्रइति अथवारवितआदित्यादिंद्रश्चेद्रमायदिवि

३५

कोणेनवपंचमेवाभवति तदापिमनसीप्सितांदिशंनगच्छति तयोर्बलीयान्स्वकाष्ठांनयति सूर्येबलवति सर्वोग
च्छति चंद्रेवायद्यग्रहाणांदिगीश्वरत्वमेवाचार्येणसर्वमेवोक्तम् रविसितभौमतमोरविजाशशिसौम्यबृहस्पतयः
इति तथावाद् ताराग्रहेभ्यःतितिजात्रिकोणेसूर्यात्रिकोणेयदिवाशशांकः ४५ अन्यदपियोगांतरमाह जन्मो
दयर्क्षेहिबकालसंस्थेयस्याशुभंदृष्टयुतंनसौम्यैः सशांटुलीशाप्ययथागरुन्मान्सैन्यंगतो तिहतसपक्षः ४६
यातर्जन्मराशिर्जन्मर्क्षं उदयराशिरुदयर्क्षं यत्राशौस्थितेचंद्रमसि जातस्तज्जन्मर्क्षंयेनलग्नराशिनाजात
स्तदुदयर्क्षं तयोरेकतमंयस्यहिबकालसंस्थेयस्यहिबकेचतुर्थस्थानेअस्तेसप्तमेवातत्कालग्रा तं अयम
र्थः यातर्जन्मराशिर्वायाजालग्नाच्चतुर्थस्थानेभवति सप्तमेवायस्यतच्चक्रीदृशंअशुभैः पापैर्दृष्टंयुक्तंवानसौम्यैः
आदित्यांगारकशनैश्चराणामन्यतमेनयुक्तंनचदृष्टंवाभवति तदासर्वजागतोहतसपक्षोहतोनष्टःसआत्मीय
पक्षोयस्यसदैन्यंदीनतांगतोभ्येतियाति यथाशांडिल्याख्यातपस्विनीगरुडोदृष्ट्वा भगवतिविसौरतां एतो
नयामीत्युक्तस्वभावस्तयातपःप्रभावाज्जातभस्मसयाशीर्णपक्षःकृतःतथापिराजाभूदृष्टसहायोपिभवति तथा
वासरा· स्वजन्मराशिर्यदिवाविलग्नान्मेष्टराणस्थितनयानदृष्टम् ४८ अन्यदपियोगांतरमाह होराष्टमेजन्मगृहा
ष्टमेवासशत्रुभाद्भुगृहोदयेवा तद्राशिगेर्वागमनेविलग्नेतस्योनराणांविषभक्षणेन ४९ होराशब्देनजन्म

लग्नमुच्यते जन्मशब्देनजन्मराशिरुच्यते स्वजन्मराशेर्यदष्टमलग्नं एवंहोराष्टमेलग्ने जन्मगृहाष्टमेवालग्नेनराणांश
रुद्राणांगमनंविषभक्षणेनतत्समम् यथाविषभक्षणेनमनुष्योम्रियते तथाहोराष्टमेयात्रालग्नेम्रियतेइति तथाचवा
दरायणः होराष्टमेजन्मगृहाष्टमेवायात्रान्दपाणांमरणायदृष्टा शत्रुभास्तत्रुराशेशत्रुजन्मलग्नाद्वायस्तत्रुभंतल
ग्नेनराणांविषभक्षणेनतत्समम् शत्रुभंषष्ठस्थानमुच्यते तथावादरा ताभ्यामरातिश्चतथाविलग्नेतद्राशिपेर्वाग
मनेविलग्नात् तदितिहोराष्टमस्यजन्मगृहाष्टमस्यशत्रुभास्तत्रुगृहस्यपरामर्षः तयोर्जन्मराशिजन्मलग्नयोर्यावष्टमौराशीतयोर्योअधिपती तयोरन्यतमोयदिलग्नगोभवतितदापिराज्ञांगमनंविषभक्षणेनतत्समेव तथावादरा· ले ८
तदीश्वरेलग्नगतेतथैवेति ४८ अथयात्रालग्नविधानमाह रिपुनिधनविलग्नेस्वत्रिषड्लग्नगेवा बलवतिभवने।
शेसेक्रूरशेशत्रुयुक्ते अनभिमुखदिगीशेदिक्पतौसुस्थितेच व्रजतियदियथेष्टंशाम्रुयात्तत्रयाता ४८ रिपोर्निध
नविलग्नेरिपोःशत्रोर्लग्नराशिःजन्मराशिश्चतयोर्योनिधनाष्टमौराशीतियोरन्यतमेवाराशौलग्नगते गंतव्यम् स्वा
त्रि मूस्वड्लाभगेवास्वात्मीयजन्मराशेःजन्मलग्नाद्वायोराशिस्त्रिषड्लाभगःतृतीयषष्ठैकादशगेवा तस्मिंल्लग्नगेराशौ
गंतव्यम् बलवत् भवनेशेसुइतिसुआत्मीये भवनेशे बलवति भवनशब्देनहोराराशिजन्मराशिश्चोच्यते
अतःहोरानाथेजन्मनाथेचबलवतिगंतव्यम् क्रूरेशत्रुयुक्तेइतिशत्रोःपतेशत्रोर्जन्मराशपाधिपेचक्रूरेबलहीनेगं ३९

तव्यम् अत्रविमुचंद्रः ४९ होराजन्मभनाथौस्यातांविबलौयदाशत्रोः यायात्रयायरात्राविबलोपितदाप्रयत्नेन
अनभिमुखदिगीशाइतियांदिशंगंतमिच्छति सज्ञातस्यांदिशियोधिपतिर्ग्रहः सयदातस्यांदिशिस्थितोभवति
तदायात्रभिमुखः संमुखोभवति तस्मिन्नभिमुखेराज्ञागंतव्यम् अनभिमुखे अन्यदिक्स्थेगंतव्यम् या
तव्यम् उक्तंच व्रजतियदिललाटेगेदिगीशेपतितेततोडुमवसरिन्नटस्थइति अथदिगीश्वरस्योभयथासम्म
खेतेतेयम् यस्यांदिशियविमंडलात्रिष्वप्यभ्रस्थितोग्रहोभवति यस्यांचदिशितस्मिन्कालेभवतितत्रच रत्ना
वलिः ४९ उदितोयतश्चभ्रमणेभवतिग्रहस्तत्कालम् यात्राकाष्ठानाथेनमनसापितांदिशंयायात् ५०
भ्रमणेचक्रभ्रमणेइति तद्यथा लग्नस्थेग्रहेपूर्वस्यांदिशिस्थितोज्ञेयः द्वितीयतृतीयस्थेदक्षिणस्याम् चतुर्थस्थ
उत्तरस्याम् पंचमषष्ठस्थेवायव्याम् सप्तमस्थेवारुण्याम् अष्टमनवमस्थेनैर्ऋत्याम् दशमस्थेदक्षिणस्याम्
एकादशद्वादशस्थेचआग्नेय्याम् इतिक्रूरौसुस्थितेचगंतव्यम् सतेत्रिमित्रतेत्रिकोणेवर्गोत्तमेवास्थि
तोदिक्पतिःसुस्थितोज्ञेयः तथावादरायणः वर्गोत्तमांशोपगतेदिगीशेसुस्थितेवास्वत्रिकोणगेवा स्वोच्चा
र्गेमित्रगृहोपगेवाशत्रोर्बलंहंतिगतःप्रसह्य एतेषुशत्रुराशुषष्ठमलग्नादिषुयदियात्रावजतियात्रायांगच्छति।
तदर्थयथेयथाभिलषितमर्थंतत्रतस्मिन्कालेप्राप्नुयाल्लभते मनसापियत्रेच्छतितमाप्नोति एतदुक्तंभवति

मनोरथानामप्यगम्यानिफलानिप्राप्नोति ५० पुनरपिलग्नशुद्धिमाह केंद्रत्रिकोणेषुशुभाःप्रशस्ताःक्रूरेष्वेवपापानशुभप्र
दास्युः पापोपिकामंबलवान्निर्येज्यःकेंद्रेषुशून्यंनशिवायकेंद्रम् ५१ शुभग्रहाःकेंद्रत्रिकोणेषुप्रशस्ताः उक्तंच एकस्मि
न्दिकेंद्रेसौम्योनग्रहोस्तियात्रायाम् जन्मन्यथवाकर्मणिनतच्छुभंप्राहुराचार्याः इतिनकेवलंयात्रायांसर्वकर्मसि
ति यथासम्भवंतेष्वेवपापानशुभप्रदास्युःतेष्वेवकेंद्रत्रिकोणेषुपापाग्रहाः नशुभफलदाःएवंपापस्तावत् नशोभनः
